श्रीः ।

शिवहरराजधानीपति-

श्रीराजादेवनन्दनसिंहबहादूरनराधिप-

संगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

सप्तमं

धूमावतीतन्त्रम् ।

उक्तराजगुरुवंश्यपण्डितश्रीरघुराज-

दुबेजीद्वारा संशोधितम् ।

तदेतत्

खेमराज श्रीकृष्णदासश्रेष्ठिना

मुम्बय्यां

स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रागारे

मुद्रयित्वा प्रकाशितम् ।

तृतीयावृत्तिः ।

अस्य ग्रन्थस्य पुनर्मुद्रणाधिकारः १८६७ वार्षिक २५ तमराज

नियमानुरोधेन प्रकाशकाधीनः सन्ति ।

अथ धूमावती ध्यानम्

श्रीगणेशाय नमः ।

अथ शाक्तप्रमोदः ।

धूमावतीतन्त्रम् ।


अथधूमावतीध्यानम् ।

विवर्णाचञ्चलादुष्टादीर्घाचमलिनाम्बरा ॥ विमुक्तकुन्तला रूक्षाविधवाविरलद्विजा ॥ काकध्वजरथारूढाविलम्बितपयोधरा ॥ शूर्पहस्तातिरूक्षाक्षाधृतहस्तावरान्विता ॥ प्रवृद्धघोणा तुभृशङ्कुटिलाकुटिलेक्षणा ॥ क्षुत्पिपासार्दितानित्यम्भयदाकलहास्पदा ॥



अथयन्त्रोद्धारः ।

अनुक्तकल्पेयन्त्रन्तु लिखेत्पद्मन्दलाष्टकम् ॥
षट्कोणकर्णिकन्तत्रवेदद्वारोपशोभितम् ॥



अथमन्त्रोद्धारः ।

दान्तौसाव्वींशविन्द्वन्तौबीजेधूमावतीद्विठः ॥
धूमावतीमनु५प्रोक्तोवैरिनिग्रहकारकः ॥

अथमन्त्रः ।

धूँधूँधूमावतीठःठः ।

अथपूजाविधिः ।

तत्रप्रथममृष्यादिन्यासङ्कुर्य्यात् ॥ शिरसिपिप्पलादमुनये नमःमुखेनिचृच्छन्दसेनमः हृदिधूमावत्यैदेवतायैनमः ॥ अथाङ्गन्यासः ॥ ॐधाँहृदयायनमः ॐधींशिरसेस्वाहा ॐधूँशिखायैवषट् ॐधैंकवचायहूम् ॐधौंनेत्रत्रयायवौषट् ॐधः अस्त्रायफट् । तत ५ करन्यासः ॥ ॐ धाँअङ्गुष्ठाभ्यान्नमः ॐ धींतर्ज्जनीभ्यांस्वाहा ॐ धूँमध्यमाभ्याव्वँषट् ॐ धैंअनामिकाभ्यांहूम् ॐ धौंकनिष्ठाभ्याव्वौषट् ॥ ॐ ध५ करतलकरपृष्ठाभ्याम्फट् ततोध्यानम् ॥ विवर्ण्णाचञ्चलाकृष्णादीर्घाचमलिनाम्बरा ॥ विमुक्तकुन्तलारूक्षाविधवाविरलद्विजा ॥ १ ॥ काकध्वजर

थारूढाविलम्बितपयोधरा ॥ शूर्पहस्तातिरूक्षाक्षाधूतहस्ता वरान्विता ॥ २ ॥ प्रवृद्धघोणातुभृशङ्कुटिलाकुटिलेक्षणा ॥ क्षुत्पिपासार्दितानित्यम्भयदाकलहास्पदा ॥ ३ ॥ इतिध्यात्वा प्राणादीन्प्रतिष्ठापयेत् ॥ तद्यथा ॥ आँह्रींक्रोंयँरँलँवँशँषँसँहों ॐक्षँसँहँसः ह्रींॐहँसःश्रीमद्धूमावत्याः प्राणाइहप्राणाः ॥ आँ ह्रींक्रोंयँरँलँवँशँषँसँहों ॐक्षँसँहँसःह्रींओंहँसः श्रीमद्धूमावत्याजीव इहस्थितः । ॐह्रींक्रोंयँरँलँवँशँषँसँहों ॐक्षँसँहँसःह्रींॐहँसःश्री मद्धूमावत्यास्सर्व्वेन्द्रियाणिइहस्थितानि। आँह्रींक्रोंयँरँलँवँशँषँसँ होंॐक्षँसँहँसःह्रींॐहँसः श्रीमद्धूमावत्यावाङ्मनश्चक्षुश्श्रोत्रघ्रा णप्राणाइहागत्यसुखञ्चिरन्तिष्ठन्तुस्वाहा ॥ ततोदेवतारूपमात्मा नन्ध्यात्वा प्राणायाममृष्यादिन्यासषडङ्गन्यासकरन्यासान्वि धाय मातृकान्यासमाचरेत् ॥ तत्रओमस्यमातृकामन्त्रस्यब्रह्मा ऋषिर्ग्गायत्री छन्दोमातृकासरस्वतीदेवताहलोबीजानिस्वरा श्शक्तयस्तदुभयङ्कीलकमभीष्टसिद्धचर्त्थेविनियोगः । शिरसिब्र ह्मणेऋषयेनमः मुखेगायत्रीछन्दसेनमः । हृदिमातृकासरस्वत्यै देवतायैनमः ॥ लिङ्गेहल्भ्योबीजेभ्योनमः पादयोस्स्वरेभ्यश्श क्तिभ्योनमः।सर्व्वाङ्गेतदुभयकीलकायनमः॥अथषडङ्गन्यासः ॥ अँकँखँगँघँङँआँहृदयायनमःइँचँछँजँझँञँईँशिरसेस्वाहा उँटँठँड ढँणँऊँशिखायैवषट् एँतँथँदँधँनँऐंकवचायहूम् ओंपँफँबँभँमँऔंने त्रत्रयायवौषट् अँयँरँलँवँशँषँहँक्षँअः अस्त्रायफट् ॥ एवङ्करन्या सोयथा ॥ अँकँखँगँघँङँआँअङ्गुष्ठाभ्यान्नमः इँचँछँजँझँञँईतर्ज्ज नीभ्यांस्वाहा उँटँठँडँढँणँऊँमध्यामाभ्याँव्वषट् एँतँथँदँधँनँऐंअना मिकाभ्यांहूम्ओंपँफँबँभँमँऔंकनिष्ठिकाभ्याँव्वौषट् अँयँरँलँवँशँ षँसँहँक्षँअःकरतलकरपृष्ठाभ्याम्फट् ॥अथमातृकान्यासः ॥ ललाटेअँनमः मुखवृत्तेआँनमः दक्षनेत्रेइंनमः वामनेत्रेईनमः दक्षकर्ण्णे

उँनमः वामकर्ण्णेऊँनमः दक्षनासायामृँनमः वामनासायामॠँनमःदक्षगण्डेलृँनमः वामगण्डेलॄँनमः ऊर्ध्वोष्ठेएँनमः अधरोष्ठेऐंनमः ऊर्ध्वदन्तपङ्क्तौओंनमः अधोदन्तपङ्क्तौऔंनमः शिरसिअँनमः मुखेअःनमः दक्षिणबाहुमूले कँनमः कूर्प्परेखँनमः मणिबन्धेगँनमः अङ्गुलीमूलेघँनमः अङ्गुल्यग्रेङँनमः वामबाहुमूले चँनमः कूर्प्परेछँनमः मणिबन्धेजंनमः अङ्गुलीमूलेझँनमः अङ्गुल्यग्रेञँनमः दक्षिणोरुमूलेटँनमः जानुनिठँनमः गुल्फेडँनमः अङ्गुलीमूलेढँनमः अङ्गुल्यग्रेणँनमः वामोरुमूलेतँनमः जानुनिथँनमः गुल्फेदँनमः अङ्गुलीमूलेधँनमः अङ्गुल्यग्रेनँनमः दक्षपार्श्वेपँनमः वामपार्श्वेफँनमः पृष्ठेबँनमः नाभौभँनमः उदरेमँनमः हृदयेयँत्वगात्मनेनमः दक्षांसेरँअसृगात्मनेनमः ककुदिलँमांसात्मनेनमः वामांसेवँमेदआत्मनेनमः हृदयाद्दक्षभुजाग्रान्तंशमस्थ्यात्मनेनमः हृदयाद्वामभुजाग्रान्तंषँमज्जात्मनेनमः हृदयाद्दक्षपादाग्रान्तंसँशुक्रात्मनेनमः हृदादिवामपादाग्रान्तंहँआत्मनेनमः हृदयान्मस्तकान्तं क्षंपरमात्मनेनमः ॥ इतिबहिर्म्मातृकान्यासः ॥ ततोमानसैरुपचारैर्देवीम्पूजयेत् ॥ तत्रप्रार्थ्ययेदनेन मन्त्रेण ॥ धूमावतिस्वागतन्ते सन्निधौभवसाम्प्रतम् ॥ गृहाण मानसीम्पूजाय्यँथार्थपरिभावितम् ॥ ततोऽष्टोत्तरशतम्मूलमन्त्रञ्वँर्ण्णमय्यामालयाजपेत् ॥ इतिमानसीपूजाविधिः ॥ अथबहिःपूजा ॥ तत्रप्राणायामषडङ्गन्यासादिविधाय प्रथमञ्चतुःपोडशाष्टवारजप्तेनमूलमन्त्रेणपूरककुम्भकरेचकाख्यम्प्राणायामत्रयङ्कृत्वा ततः षडङ्गन्यासादिकुर्य्यात् । तद्यथा । धांहृदयायनमः धींशिरसेस्वाहा धूँशिखायैवषट् धैंकवचायहूम् धौंनेत्रत्रयायवौषट् धः अस्त्रायफट् ॥ इतिछोटिकयादिग्बन्धनङ्कुर्य्यात् ॥ एवङ्करन्यासः ॥ धांअङ्गुष्ठाभ्यान्नमः धींतर्ज्जनीभ्यांस्वाहा धूँ

मध्यमाभ्याञ्चँषट् धैंअनामिकाभ्यांहूम् धौंकनिष्ठिकाभ्याञ्चौं षट् धः करतलकरपृष्ठाभ्याम्फट्॥एवन्न्यासादिकृत्वाअर्घ्यंस्था पनङ्कुर्य्यात्॥ तद्यथा॥ त्रिकोणवृत्तषट्कोणचतुरस्रमण्ड लँञ्चिरच्यइमितिविलिख्यमूलमन्त्रेणत्रिकोणंसम्पूज्यषडङ्गेषुषड ङ्गंसम्पूज्य। चतुरस्रेपूर्णगिरिपीठायनम इतिपूर्व्वे उड्डीया नपीठायनमइतिदक्षिणे कामरूपपीठायनमइतिपश्चिमे जाल न्धरपीठायनमइत्युत्तरे॥ इतिसम्पूज्य॥ मध्ये ॐआधारशक्त येनम इतिसम्पूज्य त्रिकोणगर्भषट्कोणभूषिताय्यन्त्रिकाम्मूले नसँस्थाप्यनमइतिसामान्यार्घ्यंस्थजलेनाभ्युक्ष्य॥गङ्गेचयमुने चैवगोदावरिसरस्वति॥ नर्म्मदेसिन्धुकावेरिजलेस्मिन्सन्निधि ङ्कुरु॥ ॐब्रह्माण्डोदरतीर्थानिकरैस्स्पृष्टानितेरवे॥ तेनसत्ये नमेदेवतीर्थन्देहिदिवाकर॥ इत्यादिभिस्तीर्थान्यावाह्याङ्कुश मुद्रयावौषडितिपुष्पम्॥ वषडित्यनेनगालिनीमुद्राम्प्रदर्श्यवमि तिधेनुमुद्रयाऽमृतीकृत्य इष्टदेवतान्ध्यात्वासम्पूज्य सकलीकृत्य शङ्खमुद्राम्प्रदर्श्यषट्कोणेषडङ्गञ्चसम्पूज्य पूर्व्ववद्धूमावती न्देवीन्ध्यात्वाआवाहयेत्॥तद्यथा॥ मूलमन्त्रम्पठन्ॐभगवतिधू मावतिइहागच्छइतिप्रसारितसंहताङ्गुलीमूलपर्व्वणोरङ्गुष्ठौनि क्षिप्यआवाहयेत्॥ मूलम्पठन् धूमावतिदेविइहतिष्ठ इत्यधो मुख्यामुद्रास्थापयेत्॥ मूलम्पठन् पद्ममुद्रयापुष्पाद्यासनन्द द्यात्॥ ततःॐअस्मिन्वरासनेदेविमुखासीनेऽक्षरात्मिके॥ प्रति ष्ठिताभवेःसात्वंप्रसीदपरमेश्वरि॥ मूलञ्चपठन्इहप्रतिष्ठिताभवे तिपूर्वोक्तयामुद्रयाप्रतिष्ठापयेत्॥ पूर्व्वोक्तप्राणप्रतिष्ठाविधिनाप्रा णान्प्रतिष्ठाप्य ततोमूलमन्त्रेणार्घ्योदकेनत्रिः प्रोक्षणम्॥ ततः पाद्यम्॥ मूलम्पठन् इदम्पाद्यंश्रीधूमावत्यैनिवेदयामिनम इति पादयोर्द्दद्यात्॥ ततोमूलम्पठन् इदमाचमनीयं श्रीधूमावत्यैनिवे

दयामिनमइतिमुखेदद्यात्॥मूलम्पठन् साङ्गायैसायुधायैसवाहना यै सपरिवारायैश्रीधूमावत्यैइमम्मधुघृतशर्क्करादधिदुग्धसङ्घात्म कम्मधुपर्क्कन्निवेदयामिनमइतिमुखेदद्यात्॥मूलम्पठन् इदम्पुनरा चमनीयंसाङ्गायैइत्यादिश्रीधूमावत्यैनिवेदयामिनमइतिमुखेदद्या त् ॥ मूलम्पठन् इदमर्घ्यं साङ्गायैइत्यादिश्रीधूमावत्यैनिवेदया मिनमइतिशिरसिदद्यात् ॥ मूलम्पठन् इदंहरिद्राद्युद्वर्त्तनंसाङ्गायै इत्यादिश्रीधूमावत्यैनिवेदयामिनमः ॥ॐपरमानन्दबोधाब्धिनि मग्ननिजमूर्त्तये ॥ साङ्गोपाङ्गमिदंस्नानङ्कल्पयाम्यहमीश्वरि ॥ मू लञ्चपठन् इदंस्नानीयंसाङ्गायैइत्यादिश्रीधूमावत्यैनिवेदयामिनम इतिशतकृत्वः सहस्रकृत्वोयथाशक्तिवास्नापयेत् ॥ मूलम्पठन् इद व्वँासस्साङ्गायैइत्यादिश्रीधूमावत्यैनिवेदयामिनमइतिवासोदद्या त् ॥ मूलम्पठन् इदमुत्तरीयंसाङ्गायैइत्यादिश्रीधूमावत्यैनिवेद यामिनमइत्युत्तरीयन्दद्यात्॥ मूलम्पठन् इदञ्चन्दनंसाङ्गायैइत्या दिश्रीधूमावत्यैनिवेदयामिनमः ॥ मूलम्पठन् एतान् अक्षतान्सा ङ्गायैइत्यादिश्रीधूमावत्यैनिवेदयामिनमः ॥ मूलम्पठन् एतानि पुष्पाणिसाङ्गायैइत्यादिश्रीधूमावत्यैवौषट् ॥ जयध्वनिमातः स्वाहेतिघण्टां सम्पूज्य मूलम्पठन्ॐवनस्पतिरसोपेतोगन्धा ढ्यःसुमनोहरः ॥ आघ्रेयःसर्व्वदेवानान्धूपोऽयम्प्रतिगृह्यताम्॥ए षधूपस्साङ्गायैइत्यादिश्रीधूमावत्यैनिवेदयामिनमइतिवामहस्ते नघण्टाञ्चवादयन् दक्षतर्ज्जन्यङ्गुष्ठयोगेनधूपमुद्राम्प्रदर्शयन्देवता गुणान्कीर्त्तयन्नाभिदेशतोधूपयेत् ॥ मूलम्पठन् एषपुष्पाञ्जलि स्साङ्गायैइत्यादिश्रीधूमावत्यैनिवेदयामिनमइतिपुष्पाञ्जलित्रय न्दद्यात्॥ॐसुप्रकाशोमहादीपःसर्व्वतस्तिमिरापहः॥सबाह्याभ्य न्तरज्योतिर्द्दीपोयम्प्रतिगृह्यताम् ॥मूलञ्चपठन् मध्याङ्गुष्ठयोगेन दीपमुद्राम्प्रदर्शयन् नेत्रप्रदेशेदीपन्दर्शयेत्॥ घृतदीपोदक्षिणेतै

लदीपोवामतः॥ ॐसत्पात्रसिद्धंसहविर्व्विविधानेकभक्षणम्॥निवेदयामिदेवेशिकृपयात्वङ्गृहाणतत् ॥ मूलञ्चपठन् ग्रासमुद्राम्प्रदर्श्यशङ्खोदकेननिवेदयेत् ॥ ॐसमस्तंदेवदेवेशिसर्व्वावाप्तिकरम्परम् ॥ अखण्डानन्दसम्पूर्णंगृहाणजलमुत्तमम् ॥ इतिपानीयञ्चदत्वाचुलुकँव्विधिवद्दद्यात् ॥ ॐएलालवङ्गकर्पूरनागवल्लीदलैर्युतम् ॥ पूगभागेरितन्देवीताम्बूलम्प्रतिगृह्यताम् ॥ मूलञ्चपठन् इदन्ताम्बूलंसाङ्गायैइत्यादिश्रीधूमावत्यैनिवेदयामिनमइतिमुखप्रदेशेतत्वमुद्रयादद्यात् ॥ ततःपुष्पाञ्जलित्रयन्दद्यात् ॥ बलिदानप्रकारेणयथाशक्तिबलिमपिदद्यात् ॥ इतिश्रीमद्धूमावतीपूजाविधानंसम्पूर्णम् ॥

अथस्तोत्रम् ।

प्रातर्य्यास्यात्कुमारीकुसुमकलिकयाजापमालाजपन्तीमध्याह्नेप्रौढरूपाविकसितवदनाचारुनेत्रानिशायाम् ॥ सन्ध्यायाँवृद्धरूपागलितकुचयुगामुण्डमालाँवहन्ती सादेवीदेवदेवीत्रिभुवनजननीकालिकापातुयुष्मान् ॥ १ ॥ वह्वाखट्वाङ्गकोटौकपिलवरजटामण्डलम्पद्मयोनेः कृत्वादैत्योत्तमाङ्गैःस्रजमुरसिशिरश्शेखरन्तार्क्ष्यपक्षैः ॥ पूर्णैरक्तैस्सुराणाँय्यममहिषमहाशृङ्गमादायपाणौ पायाद्वोवन्द्यमानप्रलयमुदितयाभैरवःकालरात्र्याम् ॥ २ ॥ चर्व्वन्तीमस्थिखण्डम्प्रकटकटकटाशब्दसङ्घातमुग्रङ्कुर्व्वाणाप्रेतमध्येकहहकहकहाहास्यमुग्रङ्कशाङ्गी ॥ नित्यन्नित्यप्रसक्ताडमरुडिमडिमांस्फारयन्तीमुखाब्जम्पायान्नश्चण्डिकेयंझझमझमझमाजल्पमानाभ्रमन्ती ॥ ३ ॥ टण्टण्टण्टण्टण्टाप्रकरटमटमानाटघण्टाँवहन्ती स्फेंस्फेंस्फेंस्कारकाराटकटाकितहसानादसङ्घट्टभीमा ॥ लोलम्मुण्डाग्रमालाललहलहलहालोललोलाग्रवाचश्चर्व्वन्तीचण्डमुण्डंमटमटमटितेचर्व्व

यन्तीपुनातु ॥ ४ ॥ वामेकर्ण्णेमृगाङ्कप्रलयपरिगतन्दक्षिणेसूर्य्य विम्बङ्कण्ठेनक्षत्रहारंव्वरविकटजटाजूटकेमुण्डमालाम् ॥ स्कन्धे कृत्वोरगेन्द्रध्वजनिकरयुतम्व्रह्मकङ्कालभारंसंहारेधारयन्तीममह रतुभयम्भद्रदाभद्रकाली ॥ ५ ॥ तैलाभ्यक्तैकवेणीत्रपुमय विलसत्कर्ण्णिकाक्रान्तकर्ण्णा लौहेनैकेनकृत्वाचरणनलिनका मात्मनःपादशोभाम् ॥ दिग्वासारासभेनग्रसतिजगदिदंय्या यत्राकर्ण्णपूरा वर्ष्मिण्यातिप्रबद्धाध्वजवितत भुजासासिदेवित्व मेव ॥ ६ ॥ सङ्ग्रामेहेतिकृत्वैस्सरुधिरदशनैर्य्यद्भटानांशिरो भिर्म्मालामावद्धयमूर्ध्निध्वजवितत भुजात्वंश्मशानेप्रविष्टा॥ दृष्टा भूतप्रभूतैः पृथुतरजघनावद्धनागेन्द्रकाञ्ची शूलाग्रव्यग्रहस्ताम धुरुधिरसदाताम्रनेत्रानिशायाम् ॥ ७ ॥ दंष्ट्रारौद्रेमुखेऽस्मिंस्त वविशतिजगद्देविसर्व्वक्षणार्द्धात्संसारस्यान्तकालेनररुधिरवशा सम्प्लवे भूमधूम्रे ॥ कालीकापालिकीसाशवशयनतरायोगिनी योगमुद्रा रक्तारुद्धिःसभास्थामरणभयहरात्वंशिवाचण्डघण्ठा॥ ॥ ८ ॥ धूमावत्यष्टकम्पुण्यंसर्व्वापद्विनिवारकम् ॥ यःपठेत्सा धकोभक्त्यासिद्धिंव्विन्दतिवाञ्छिताम् ॥ ९ ॥ महापदिमहा घोरेमहारोगेमहारणे ॥ शत्रूच्चाटेमारणादौजन्तूनाम्मोहनेतथा ॥ १० ॥ पठेत्स्तोत्रमिदन्देविसर्व्वत्रासिद्धिभाग्भवेत् ॥ देवदान वगन्धर्व्वायक्षराक्षसपन्नगाः ॥ ११ ॥ सिंहव्याघ्रादिकास्सर्व्वे स्तोत्रस्मरणमात्रतः ॥ दूराद्दूरतरय्यान्तिकिम्पुनर्म्मानुषाद यः ॥ १२ ॥ स्तोत्रेणानेनदेवेशि किन्नसिद्ध्यतिभूतले ॥ सर्व्व शान्तिर्भवेद्देविह्यन्तेनिर्व्वाणताव्व्रजेत् ॥ १३ ॥ इत्यूर्द्धाम्नायेधू मावतीस्तोत्रंसमाप्तम् ॥

अथकवचम् ।

श्रीपार्व्वत्युवाच ॥ धूमावत्यर्च्चनंशम्भोश्रुतंव्विस्तरतोमया ॥

कवचंश्रोतुमिच्छामितस्यादेववदस्वमे ॥ श्रीभैरवउवाच ॥ शृणुदेविपरङ्गुह्यन्नप्रकाश्यङ्कलौयुगे ॥ कवचंश्रीधूमावत्या श्शत्रुनिग्रहकारकम् ॥ ब्रह्माद्यादेविसततय्यद्धशादरिघातिनः ॥ योगिनोभवञ्छत्रुन्नायस्याध्यानप्रभावतः ॥ ओमस्यश्रीधूमाव तीकवचस्यपिप्पलादऋषिरनुष्टुप्छन्दः श्रीधूमावतीदेवताधूँबी जं स्वाहाशक्तिःधूमावतीकीलकं शत्रुहननेपाठेविनियोगः ॥ ॐ धूँबीजंमेशिरःपातु धूंललाठंसदावतु ॥ धूमानेत्रयुगम्पातुवती कर्ण्णौसदावतु ॥ दीर्घातूदरमध्येतुनाभिम्मेमलिनाम्बरा ॥ शू र्प्पहस्तापातुगुह्यंरूक्षारक्षतुजानुनी ॥ मुखम्मेपातुभीमाख्यास्वा हारक्षतुनासिकाम् ॥ सर्व्वाविद्याऽवतुकण्ठँव्विवर्ण्णाबाहुयुग्मक म् ॥ चञ्चलाहृदयम्पातुदुष्टापार्श्वंसदाऽवतु ॥ धूमहस्तासदापा तुपादौपातुभयावहा ॥प्रवृद्धरोमातुभृशङ्कुटिलाकुटिलेक्षणा ॥ क्षु त्पिपासार्दितादेवीभयदाकलहप्रिया॥ सर्व्वाङ्गम्पातुमेदेवीसर्व्वश त्रुविनाशिनी ॥ इतितेकवचम्पुण्यङ्कथितम्भुविदुर्ल्लभम् ॥ न प्रकाश्यन्नप्रकाश्यन्नप्रकाश्यङ्कलौयुगे ॥ पठनीयम्महादेविन्रिस न्ध्यन्ध्यानतत्परैः ॥ दुष्टाभिचारोदेवेशितद्वात्रन्नैवसंस्पृशेत् ॥ इतिभैरवीभैरवसंव्वादेधूमावतीतन्त्वेधूमावतीकवचंसम्पूर्ण्णम् ॥

अथहृदयम्।

ओमस्यश्रीधूमावतीहृदयस्तोत्रमन्त्रस्यपिप्पलादऋषिरनु ष्टुप्छन्दश्श्रीधूमावतीदेवताधूम्बीजंह्रींशक्तिःक्रींकीलकंसर्व्वशत्रु संहारणेपाठेविनियोगः ॥ अथाङ्गन्यासः ॥ ओंधाँहृदयायनमः धींशिरसेस्वाहा धूँशिखायैवषट् धैंकवचायहूम् धौंनेत्रत्रयायवौ षट् धः अस्त्रायफट् ॥ एवङ्करन्यासोयथा ॥ धांअङ्गुष्टाभ्यान्नमः धींतर्ज्जनीभ्यांस्वाहा धूंमध्यमाभ्याँव्वषट् धैंअनामिकाभ्यांहूम्

धौंकनिष्ठाभ्याञ्चौषट् धरःकरतलकरपृष्ठाभ्याम्फट् ॥ अथध्यानम् ॥ धूम्राभान्धूम्रवस्त्राम्प्रकटितदशनाम्मुक्तबालाम्बराढ्याङ्काकाङ्कस्यन्दनस्थान्धवलकरयुगांशूर्प्पहस्तातिरूक्षाम् ॥ नित्यङ्क्षुत्क्षान्तदेहाम्मुहुरतिकुटिलाव्वारिवाञ्छाविचित्तां ध्याये द्धूमावतीव्वामनयनयुगलाम्भीतिदाम्भीषणास्याम् ॥ १ ॥ कल्पादौयाकालिकाद्याऽचीकलन्मधुकैटभौ ॥ कल्पान्तेत्रिजगत्सर्व्वंधूमावतीम्भजामिताम् ॥ २ ॥ खट्वाङ्गधारिणीखर्व्वाखण्डिनीखलरक्षसाम् ॥धारिणीखेटकस्यापिधूमावतीम्भजामिताम् ॥३॥ गुणागारागम्यगुणा यागुणा गुणवर्द्धिनी ॥ गीतावेदार्त्थतत्त्वज्ञैर्धूमावतीम्भजामिताम् ॥ ४ ॥ घूर्ण्णघूर्ण्णकराघोराघूर्ण्णिताक्षी घनस्वना ॥ घातिनीघातकानाय्यँा धूमावतीम्भजामिताम् ॥ ॥ ५ ॥ चर्व्वन्तीमस्थिखण्डानाञ्चण्डमुण्डविदारिणीम् ॥ चण्डाट्टहासिनीन्देवीम्भजेधूमावतीमहम् ॥ ६ ॥ छिन्नग्रीवाङ्कताच्छन्नाञ्च्छिन्नमस्तास्वरूपिणीम्॥ छेदिनीन्दुष्टसङ्घानाम्भजेधूमावतीमहम् ॥ ७ ॥ जातायायाचितादेवैरसुराणाँव्विघातिनीम् ॥ जल्पन्तीबहुगर्ज्जन्तीभजेतान्धूम्ररूपिणीम् ॥ ८ ॥ झङ्कारकारिणाझञ्झाझञ्झमाझमवादिनीम् ॥ झटित्याकर्षिणीन्देवीम्भजेधूमावतीमहम् ॥ ९ ॥ टीपटङ्कारसंयुक्तान्धनुष्टङ्कारकारिणीम् ॥ घोराघनघटाटोपाव्वँन्देधूमावतीमहम् ॥ १० ॥ ठण्ठण्ठण्ठम्मनुप्रीतिण्ठःठःमन्त्रस्वरूपिणीम् ॥ ठमकाह्वगतिप्रीतां भजेधूमावतीमहम् ॥ ११ ॥ डमरूडिण्डिमारावाण्डाकिनीगणमण्डिताम् ॥ डाकिनीभोगसन्तुष्टाम्भजेधूमावतीमहम् ॥ ॥ १२ ॥ ढक्कानादेनसन्तुष्टाण्ढक्कावादकसिद्धिदाम् ॥ ढक्कावादचलच्चित्ताम्भजेधूमावतीमहम् ॥ १३ ॥ तत्त्ववार्त्तांप्रियप्राणाम्भवपाथोधितारिणीम् ॥ तारस्वरूपिणीन्ताराम्भजेधूमावतीम

हम् ॥ १४ ॥ थांथीं थूंथेंमन्त्ररूपांथैंथौंथंथःस्वरूपिणीम् ॥ थकारवर्ण्णसर्व्वस्वाम्भजेधूमावतीमहम् ॥१५॥ दुर्ग्गास्वरूपिणीन्देवीन्दुष्टदानवदारिणीम्॥ देवदैत्यकृतध्वंसाव्वन्देधूमावतीमहम् ॥ १६ ॥ ध्वान्ताकारान्धकध्वंसाम्मुक्तधर्म्मालधारिणीम्॥धूमधाराप्रभान्धीराम्भजेधूमावतीमहम् ॥ १७ ॥ नर्त्तकीनटनप्रीतान्नात्यकर्म्मविवर्द्धिनीम् ॥ नारसिंहीन्नरारा्ध्यान्नौमि धूमावतीमहम् ॥ १८ ॥ पार्व्वतीपतिसम्पूज्याम्पर्व्वतोपरिवासिनीम् ॥ पद्मारूपाम्पद्मपूज्यान्नौमिधूमावतीमहम् ॥ १९ ॥ फूत्कारसहितश्वासाम्फट्मन्त्रफलदायिनीम् ॥ फेत्कारिगणसंसेव्यांसेवेधूमावतीमहम् ॥ २० ॥ बलिपूज्याम्बलाराध्याम्वगलारूपिणीव्वराम्॥ब्रह्मादिवन्दितांव्विद्याव्वन्देधूमावतीमहम् ॥ २१ ॥ भव्यरूपाम्भवाराध्याम्भुवनेशीस्वरूपिणीम् ॥ भक्तभव्यप्रदान्देवीम्भजेधूमावतीमहम् ॥ २२ ॥ मायाम्मधुमतीम्मान्याम्मकरध्वजमानिताम् ॥ मत्स्यमांसमदास्वादाम्मन्येधूमावतीमहम् ॥ २३ ॥ योगयज्ञप्रसन्नास्याय्योगिनीपरिसेविताम् ॥ यशोदायज्ञफलदाय्यजेधूमावतीमहम् ॥ २४ ॥ रामाराध्यपदद्वन्द्वांरावणध्वंसकारिणीम् ॥ रमेशरमणीपूज्यामहन्धूमावतींश्रये ॥ ॥ २५ ॥ लक्षलीलाकलालक्ष्याँल्लोकवन्द्यपदाम्बुजाम् ॥ लम्बितास्वीजकोशाढ्याव्वन्देधूमावतीमहम् ॥ २६ ॥ बकपूज्यपदाम्भोजाम्बकध्यानपरायणाम् ॥ बालाम्बकारिसन्ध्येयाव्वन्देधूमावतीमहम् ॥ २७ ॥ शङ्करींशङ्करप्राणांसङ्कटध्वंसकारिणीम् ॥ शत्रुसंहारिणींशुद्धांश्रयेधूमावतीमहम् ॥ २८ ॥ षडाननारिसंहन्त्रींषोडशीरूपधारिणीम् ॥ षड्रसास्वादिनींसौम्यांसेवेधूमावतीमहम् ॥ २९ ॥ सुरसेवितपादाब्जांसुरसौख्यप्रदायिनीम् ॥ सुन्दरीगणसंसेव्यांसेवेधूमावतीमहम् ॥३०॥ हेरम्बजननीय्यो

ग्यांहास्यलास्यविहारिणीम् ॥ हारिणींशत्रुसङ्घानांसेवेधूमावतीमहम् ॥ ३१ ॥ क्षीरोदतीरसञ्चासाङ्क्षीरपानप्रहर्षिताम् ॥ क्षणदेशेज्यपादाब्जांसेवेधूमावतीमहम् ॥ ३२ ॥ चतुस्त्रिंशद्वर्णकानाम्प्रतिवर्णादिनामभिः ॥ कृतन्तुहृदयस्तोत्रन्धूमावत्यास्सुसिद्धिदम् ॥ ३३ ॥ यइदम्पठतिस्तोत्रम्पवित्रम्पापनाशनम् ॥ सप्राप्नोतिपरांसिद्धिन्धूमावत्याःप्रसादतः ॥ ३४ ॥ पठन्नेकाग्रचित्तोयोयद्यदिच्छतिमानवः ॥ तत्सर्वंसमवाप्नोतिसत्यंसत्यंवदाम्यहम् ॥ ३५ ॥ इति धूमावतीहृदयंसमाप्तम् ॥

अथ शतनाम।

ईश्वरउवाच ॥ ॐधूमावतीधूम्रवर्णाधूम्रपानपरायणा ॥ धूम्राक्षमथिनीधन्याधन्यस्थाननिवासिनी॥ १॥ अघोराचारसन्तुष्टा अघोराचारमण्डिता ॥ अघोरमन्त्रसम्प्रीताअघोरमन्त्रपूजिता ॥ २ ॥ अट्टाट्टहासनिरतामलिनाम्बरधारिणी ॥ वृद्धाविरूपाविधवाविद्याचविरलद्विजा ॥ ३ ॥ प्रवृद्धघोणाकुमुखीकुटिलाकुटिलेक्षणा ॥ करालीचकरालास्याकङ्कालीशूर्पधारिणी ॥ ॥ ४ ॥ काकध्वजरथारूढाकेवलाकठिनाकुहूः ॥ क्षुत्पिपासार्दितानित्याललज्जिह्वादिगम्बरी॥ ५॥दीर्घोदरीदीर्घरवादीर्घाङ्गीदीर्घमस्तका ॥ विमुक्तकुन्तलाकीर्त्यांकैलासस्थानवासिनी ॥ ६ ॥ क्रूराकालस्वरूपाचकालचक्रप्रवर्त्तिनी ॥ विवर्णाचञ्चलादुष्टादुष्टविध्वंसकारिणी ॥ ७ ॥ चण्डीचण्डस्वरूपाचचामुण्डाचण्डनिस्स्वना ॥ चण्डवेगाचण्डगतिश्चण्डमुण्डविनाशिनी ॥८॥ चाण्डलिनीचित्ररेखाचित्राङ्गीचित्ररूपिणी ॥ कृष्णाकपर्दिनीकुल्लाकृष्णारूपाक्रियावती ॥ ९ ॥ कुम्भस्तनीमहोन्मत्तामदिरापानविह्वला॥चतुर्भुजाललज्जिह्वाशत्रुसंहारकारिणी॥ १०॥

शवारूढा शवगता श्मशानस्थानवासिनी ॥ दुराराध्या दुराचारा दुर्ज्जनप्रीतिदायिनी ॥ ११ ॥ निर्म्मांसाचनिराका राधूतहस्तावरान्विता ॥ कलहाचकलिप्रीताकलिकल्मषनाशिनी ॥ १२ ॥ महाकालस्वरूपाचमहाकालप्रपूजिता ॥ महादेवप्रियामेधामहासङ्कटनाशिनी ॥ १३ ॥ भक्तप्रियाभक्तगतिर्भक्तशत्रुविनाशिनी ॥ भैरवीभुवनाभीमाभारतीभुवनात्मिका ॥१४॥ भरुण्डाभीमनयनात्रिनेत्राबहुरूपिणी ॥ त्रिलोकेशीत्रिकालज्ञा त्रिस्वरूपात्रयीतनुः ॥ १५ ॥ त्रिमूर्त्तिश्चतथातन्वीत्रिशक्तिश्च त्रिशूलिनी ॥ इतिधूमामहत्स्तोत्रन्नाम्नामष्टशतात्मकम् ॥ १६ ॥ मयातेकथितन्देविशत्रुसङ्घविनाशनम् ॥ कारागारेरिपुग्रस्तेमहोत्पातेमहाभये ॥१७॥ इदंस्तोत्रम्पठेन्मर्त्त्योमुच्यतेसर्व्वसङ्कटैः ॥ गुह्याद्गुह्यतरङ्गुह्यङ्गोपनीयम्प्रयत्नतः ॥ १८ ॥ चतुष्पदार्थदन्नृणांसर्व्वसम्पत्प्रदायकम् ॥ १९ ॥ इतिधूमावत्यष्टोत्तरशतनामस्तोत्रंसम्पूर्णम् ॥

अथ सहस्रनाम ।

श्रीभैरव्युवाच ॥ धूमावत्याधर्म्मराज्याःकथयस्वमहेश्वर ॥ सहस्रनामस्तोत्रम्मेसर्व्वसिद्धिप्रदायकम् ॥ १ ॥ श्रीभैरवउवाच॥ शृणुदेविमहामायेप्रियेप्राणस्वरूपिणी ॥ सहस्रनामस्तोत्रम्मेभवशत्रुविनाशनम् ॥ २ ॥ ओमस्यश्रीधूमावतीसहस्रनामस्तोत्रस्यपिप्पलादऋषिःपङ्क्तिश्छन्दो धूमावतीदेवता शत्रुविनिग्रहेपाठेविनियोगः । धूमाधूमवतीधूमाधूमपानपरायणा ॥ धौताधौतागिराधात्रीधूमेश्वरनिवासिनी ॥ ३ ॥ अनन्ताऽनन्तरूपाचआकाराकाररूपिणी ॥ आद्याआनन्ददानन्दाइकाराइन्द्ररूपिणी ॥ ४ ॥ धनधान्यार्थवाणीदायशोधर्म्मप्रियेष्टदा ॥ भाग्यसौभा

ग्यभक्तिस्थागृहपर्व्वतवासिनी ॥ ५ ॥ रामरावणसुग्रीवमोहदाह नुमत्प्रिया ॥ वेदशास्त्रपुराणज्ञाज्योतिश्छन्दःस्वरूपिणी ॥ ६ ॥ चातुर्य्यचारुरुचिरारञ्जनप्रेमतोषदा ॥ कमलासनसुधावक्राच न्द्रहासास्मितानना ॥ ७ ॥ चतुराचारुकेशीचचतुर्व्वर्ग्गप्रदासु दा ॥ कलाकालधराधीराधारिणीवसुनीरदा ॥ ८ ॥ हीराहीरकव र्ण्णाभाहरिणायतलोचना ॥ दम्भमोहक्रोधलोभस्नेहद्वेषहरापरा॥ ॥ ९ ॥ नरदेवकरीरामारामानन्दमनोहरा ॥ योगभोगक्रोधलोभ हराहरनमस्कृता ॥१०॥ दानमानज्ञानमानपानगानसुखप्रदा ॥ गजगोश्वपदागञ्जाभूतिदाभूतनाशिनी ॥ ११ ॥ भवभावात थाबालावरदाहरवल्लभा ॥भगभङ्गभयामालामालतीतालनाह्रदा ॥ १२ ॥ जालवालहालकालकपालप्रियवादिनी ॥ करञ्जशील गुञ्जाढ्याचूताङ्कुरनिवासिनी ॥ १३ ॥ पनसस्थापानसक्तापन सेशकुटुम्बिनी ॥ पावनीपावनाधारापूर्ण्णापूर्ण्णमनोरथा ॥१४॥ पूतापूतकलापौरापुराणसुरसुन्दरी ॥ परेशीपरदापारापरात्मा परमोहिनी ॥ १५ ॥ जगन्मायाजगत्कर्त्रीजगत्कीर्त्तिर्ज्जगन्मयी ॥ जननीजयिनीजायाजिताजिनजयप्रदा ॥ १६ ॥ कीर्त्तिर्ज्ञान ध्यानमानदायिनीदानवेश्वरी ॥ काव्यव्याकरणज्ञाकाप्रज्ञाप्र ज्ञानदायिनी ॥ १७ ॥ विज्ञाज्ञाविज्ञजयदाविज्ञाविज्ञप्रपूजिता ॥ परावरेज्यावरदापारदाशारदादरा ॥ १८ ॥ दारिणीदेवदूती चमदनामदनाम्दा ॥ परमज्ञानगम्याचपरेशीपरगापरा ॥१९॥ यज्ञायज्ञप्रदायज्ञज्ञानकार्य्यकरीशुभा ॥ शोभिनीशुम्रमथिनीनि शुम्भासुरमर्द्दिनी ॥ २० ॥ शाम्भवीशम्भुपत्नीचशम्भुजायाशु भानना ॥ शाङ्करीशङ्कराराध्यासन्ध्यासन्ध्यासुधर्म्मिणी॥२१॥ शत्रुघ्नीशत्रुहाशत्रुप्रदाशात्रवनाशिनी ॥ शैवीशिवलयाशैलाशैल राजप्रियासदा ॥ २२ ॥ शर्व्वरीशवरीशम्भुःसुधाढ्यासौधवा

सिनी ॥ सगुणागुणरूपाचगौरवीभैरवीरवा ॥ २३ ॥ गौराङ्गी गौरदेहाचगौरीगुरुमतीगुरुः ॥ गौर्गौर्गव्यस्वरूपाचगुणानन्द स्वरूपिणी ॥२४॥ गणेशगणदागुण्यागुणागौरववाञ्छिता॥गण मातागणाराध्यागणकोटिविनाशिनी ॥ २५ ॥ दुर्गादुर्ज्जनह न्त्रीचदुर्ज्जनप्रीतिदायिनी ॥ स्वर्गापवर्गदादात्रीदीनादीनद यावती ॥ २६ ॥ दुर्ब्बिरीक्ष्यादुरादुःस्थादौःस्थभञ्जनकारिणी ॥ श्वेतपाण्डुरकृष्णाभाकालदाकालनाशिनी॥२७॥ कर्म्मनर्म्मकरी नर्म्माधर्म्माधर्म्मविनाशिनी॥ गौरीगौरवदागोदागणदागायनप्रि या ॥ २८ ॥ गङ्गाभागीरथीभङ्गाभगाभाग्यविवर्द्धिनी ॥भवानी भवहन्त्रीचभैरवीभैरवासमा ॥ २९ ॥ भीमाभीमरवाभैमीभीमान न्दप्रदायिनी ॥ शरण्याशरणाशम्याशाशिनीशङ्कनाशिनी ॥ ॥ ३० ॥ गुणागुणकरी गौणीप्रियाप्रीतिप्रदायिनी ॥ जनमोहन कर्त्रीचजगदानन्ददायिनी ॥ ३१ ॥ जिताजायाचविजयावि जयाजयदायिनी॥ कामाकालीकरालास्याखर्व्वाखञ्जाखरागदा ॥ ३२ ॥ गर्व्वागरुत्मतीधर्म्माघर्घराघोरनादिनी ॥ चराचरी चराराध्याछिन्नाछिन्नमनोरथा ॥ ३३ ॥ छिन्नमस्ताजयाजा प्याजगज्जायाचझर्झरी ॥ झकाराझीष्कृतिधीकाटङ्काटङ्कारना दिनी ॥ ३४ ॥ ठीकाठङ्कुरठक्काङ्कीठठठाङ्कारडुण्डुरा ॥ डुण्ढीता राजतीर्ण्णाचतालस्थाभ्रमनाशिनी ॥ ३५ ॥ थकाराथकरादात्री दीपादीपविनाशिनी ॥ धन्याधनाधनवतीनर्म्मदानर्म्ममोदिनी ॥ ३६ ॥ पद्मापद्मावतीपीतास्फान्ताफूत्कारकारिणी ॥ फुल्ला ब्रह्ममयीब्राह्मीब्रह्मानन्दप्रदायिनी ॥ ३७ ॥ भवाराध्याभवाध्य क्षाभगालीमन्दगामिनी ॥ मदिरामदिरेक्षाचयशोदायमपूजिता ॥ ३८ ॥ याम्यारामारामरूपारमणीललितालता ॥ लङ्केश्वरी वाक्प्रदावाच्यासदाश्रमवासिनी ॥ ३९ ॥ श्रान्ताशकाररूपा

नीशीताशीतपानीयपायिनी ॥ शारिणीशाङ्खिनीशुद्धाशङ्खा सुरविनाशिनी ॥ ५७ ॥ शर्व्वरीशर्व्वरीपूज्याशर्व्वरीशप्रपूजिता ॥ शर्व्वरीजाग्रितायोग्यायोगिनीयोगिवन्दिता ॥ ५८ ॥ योगिनीगणसंसेव्यायोगिनीयोगभाविता ॥ योगमार्ग्गरतायुक्ता योगमार्ग्गानुसारिणी ॥ ५९ ॥ योगभावायोगयुक्तायामिनी पतिवन्दिता ॥ अयोग्यायोधिनीयोद्धीयुद्धकर्म्मविशारदा ॥ ॥ ६० ॥ युद्धमार्ग्गरतानन्तायुद्धस्थाननिवासिनी ॥ सिद्धासिद्धेश्वरीसिद्धिःसिद्धिगेहनिवासिनी ॥ ६१ ॥ सिद्धरीतिस्सिद्धप्रीतिःसिद्धासिद्धान्तकारिणी ॥ सिद्धगम्यासिद्धपूज्यासिद्धवन्द्यासुसिद्धिदा ॥ ६२ ॥ साधिनीसाधनप्रीतासाध्यासाधनकारिणी ॥ साधनीयासाध्यसाध्यासाध्यसङ्गसुशोभिनी ॥६३॥ साध्वीसाधुस्वभावासासाधुसन्ततिदायिनी ॥ साधुपूज्यासाधुवन्द्यासाधुसन्दर्शनोद्यता ॥ ६४ ॥ साधुदृष्टासाधुपृष्टासाधुपोषणतत्परा ॥ सात्त्विकीसत्त्वसंसिद्धासत्त्वसेव्यासुखोदया ॥ ६५ ॥ सत्त्ववृद्धिकरीशान्तासत्त्वसंहर्ष्षमानसा ॥ सत्त्वज्ञानासत्त्वविद्यासत्त्वसिद्धान्तकारिणी ॥ ६६ ॥ सत्त्ववृद्धिस्सत्त्वसिद्धिस्सत्त्वसम्पन्नमानसा ॥ चारुरूपाचारुदेहाचारुचञ्चललोचना ॥ ६७ ॥ छद्मिनीछद्मसङ्कल्पाछद्मवार्त्ताक्षमाप्रिया ॥ हठिनीहठसम्प्रीतिर्हठवार्त्ताहठोद्यमा ॥ ६८ ॥ हठकार्य्याहठधर्म्माहठकर्म्मपरायणा ॥ हठसम्भोगनिरताहठात्काररतिप्रिया ॥ ६९ ॥ हठसम्भेदिनीहृद्याहृद्यवार्त्ताहरिप्रिया ॥ हरिणीहरिणीदृष्टिर्हरिणीमांसभक्षणा ॥ ७० ॥ हरिणाक्षीहरिणपाहरिणीगणहर्ष्षदा ॥ हरिणीगणसंहर्त्रीहरिणीपरिपोषिका ॥ ७१ ॥ हरिणीमृगयासक्ताहरिणीमानपुरस्सरा ॥ दीनादीनाकृतिर्दूनाद्राविणीद्रविणप्रदा ॥ ७२ ॥ द्रविणाचलसंव्वासाद्रवितादव्यसय्युता ॥ दी

नीशीताशीतपानीयपायिनी ॥ शारिणीशाङ्खिनीशुद्धाशङ्खा सुरविनाशिनी ॥ ५७ ॥ शर्व्वरीशर्व्वरीपूज्याशर्व्वरीशप्रपूजिता ॥ शर्व्वरीजाग्रितायोग्यायोगिनीयोगिवन्दिता ॥ ५८ ॥ योगिनीगणसंसेव्यायोगिनीयोगभाविता ॥ योगमार्ग्गरतायुक्ता योगमार्ग्गानुसारिणी ॥ ५९ ॥ योगभावायोगयुक्तायामिनी पतिवन्दिता ॥ अयोग्यायोधिनीयोद्धीयुद्धकर्म्मविशारदा ॥ ॥ ६० ॥ युद्धमार्ग्गरतानन्तायुद्धस्थाननिवासिनी ॥ सिद्धासिद्धेश्वरीसिद्धिःसिद्धिगेहनिवासिनी ॥ ६१ ॥ सिद्धरीतिस्सिद्धप्रीतिःसिद्धासिद्धान्तकारिणी ॥ सिद्धगम्यासिद्धपूज्यासिद्धवन्द्यासुसिद्धिदा ॥ ६२ ॥ साधिनीसाधनप्रीतासाध्यासाधनकारिणी ॥ साधनीयासाध्यसाध्यासाध्यसङ्घसुशोभिनी ॥ ६३ ॥ साध्वीसाधुस्वभावासासाधुसन्ततिदायिनी ॥ साधुपूज्यासाधुवन्द्यासाधुसन्दर्शनोद्यता ॥ ६४ ॥ साधुदृष्टासाधुपृष्टासाधुपोषणतत्परा ॥ सात्त्विकीसत्त्वसंसिद्धासत्त्वसेव्यासुखोदया ॥ ६५ ॥ सत्त्ववृद्धिकरीशान्तासत्त्वसंहर्ष्षमानसा ॥ सत्त्वज्ञानासत्त्वविद्यासत्त्वसिद्धान्तकारिणी ॥ ६६ ॥ सत्त्ववृद्धिस्सत्त्वसिद्धिस्सत्त्वसम्पन्नमानसा ॥ चारुरूपाचारुदेहाचारुचञ्चललोचना ॥ ६७ ॥ छद्मिनीछद्मसङ्कल्पाछद्मवार्त्ताक्षमाप्रिया ॥ हठिनीहठसम्प्रीतिर्हठवार्त्ताहठोद्यमा ॥ ६८ ॥ हठकार्य्याहठधर्म्माहठकर्म्मपरायणा ॥ हठसम्भोगनिरताहठात्काररतिप्रिया ॥ ६९ ॥ हठसम्भेदिनीहृद्याहृद्यवार्त्ताहरिप्रिया ॥ हरिणीहरिणीदृष्टिर्हरिणीमांसभक्षणा ॥ ७० ॥ हरिणाक्षीहरिणपाहरिणीगणहर्ष्षदा ॥ हरिणीगणसंहर्त्रीहरिणीपरिपोषिका ॥ ७१ ॥ हरिणीमृगयासक्ताहरिणीमानपुरस्सरा ॥ दीनादीनाकृतिर्दूनाद्राविणीद्रविणप्रदा ॥ ७२ ॥ द्रविणाचलसंव्वासाद्रविताद्रव्यसय्युता ॥ दी

ग्घादीर्ग्घपदाद्दृश्यादर्शनीयादृढाकृतिः ॥७३॥ दृढाद्विष्टमतिर्दुष्टाद्वेषिणीद्वेषिभञ्जिनी ॥ दोषिणीदोषसंयुक्तादुष्टशत्रुविनाशिनी ॥ ७४ ॥ देवतार्त्तिहरादुष्टदैत्यसङ्घविदारिणी ॥ दुष्टदानवहन्त्रीचदुष्टदैत्यनिषूदिनी ॥ ७५ ॥ देवताप्राणदादेवीदेवदुर्ग्गतिनाशिनी ॥नटनायकसंसेव्यानर्त्तकीनर्त्तकप्रिया ॥७६॥ नाट्यविद्यानाट्यकर्त्रीनादिनीनादकारिणी ॥ नवीननूतनानव्यानवीनवस्त्रधारिणी ॥ ७७ ॥ नव्यभूषानव्यमाल्यानव्यालङ्कारशोभिता ॥ नकारवादिनीनम्यानवभूषणभूषिता ॥ ७८ ॥ नीचमार्ग्गानीचभूमिर्न्नीचमार्ग्गगतिर्ग्गतिः ॥ नाथसेव्यानाथभक्तानाथानन्दप्रदायिनी ॥ ७९ ॥ नम्रानम्रगतिर्न्नेत्रीनिदानवाक्यवादिनी ॥ नारामध्यस्थितानारीनारीमध्यगताऽनघा ॥ ॥ ८० ॥ नारीप्रीतिर्न्नराराध्यानरनामप्रकाशिनी ॥ रतीरतिप्रियारम्यारतिप्रेमारतिप्रदा ॥ ८१ ॥ रतिस्थानस्थितताराध्यारतिहर्ष्षप्रदायिनी ॥ रतिरूपारतिध्यानारतिरीतिसुधारिणी ॥ ॥ ८२ ॥ रतिरासमहोल्लासारतिरासविहारिणी ॥ रतिकान्तस्तुताराशीराशिरक्षणकारिणी ॥ ८३ ॥ अरूपाशुद्धरूपाच सुरूपारूपगर्व्विता ॥ रूपयौवनसम्पन्नारूपराशीरमावती ॥ ॥ ८४ ॥ रोधिनीरोपिणीरुष्टारोपिरुद्धारसप्रदा ॥ मादिनी मदनप्रीतामधुमत्तामधुप्रदा ॥ ८५ ॥ मद्यपामद्यपध्येयामद्यपत्राणरक्षिणी ॥ मद्यपानन्दसन्दात्रीमद्यपप्रेमतोषिता ॥ ८६ ॥ मद्यपानरतामत्तामद्यपानविहारिणी ॥ मदिरामदिरारक्तामदिरापानहर्षिणी ॥ ८७ ॥ मदिरापानसन्तुष्टामदिरापानमोहिनी॥ मदिरामानसासुग्धामाध्वीपामदिराप्रदा ॥ ८८ ॥ माध्वीदानसदानन्दामाध्वीपानरतामदा ॥ मोदिनीमोदसन्दात्रीमुदितामोदमानसा ॥ ८९ ॥ मोदकर्त्रीमोददात्रीमोदमङ्गलकारिणी ॥

मोदकादानसन्तुष्टामोदकग्रहणक्षमा॥९०॥मोदकालब्धिसङ्कुद्धामोदकप्रातितोषिणी॥ मांसादामांससम्भक्षामांसभक्षणहर्षिणी॥ ९१ ॥ मांसपाकपरप्रेमामांसपाकालयस्थिता॥ मत्स्यमांसकृतास्वादामकारपञ्चकान्विता॥९२ ॥ मुद्रामुद्रान्विता मातामहामोहामनस्विनी ॥ मुद्रिकामुद्रिकायुक्तामुद्रिकाकृतलक्षणा॥ ९३ ॥ मुद्रिकालङ्कृतामाद्रीमन्दराचलवासिनी ॥ मन्दराचलसंसेव्यामन्दराचलवासिनी॥ ९४॥ मन्दरध्येयपादाब्जामन्दरारण्यवासिनी ॥ मन्दुरावासिनीमन्दामारिणीमारिकामिता ॥ ९५॥ महामारीमहामारीशमिनीशवसंस्थिता॥ शवमांसकृताहाराश्मशानालयवासिनी ॥ ९६ ॥ श्मशानसिद्धिसंहृष्टाश्मशानभवनस्थिता ॥ श्मशानशयनागाराश्मशानभस्मलेपिता॥ ९७ ॥ श्मशानभस्मभीमाङ्गीश्मशानावासकारिणी॥ शामिनीशमनाराध्याशमनस्तुतिवन्दिता ॥ ९८ ॥ शमनाचारसन्तुष्टाशमनागारवासिनी॥ शमनस्वामिनीशान्तिः शान्तसज्जनपूजिता ॥ ९९ ॥ शान्तपूजापराशान्ताशान्तागारप्रभोजिनी ॥ शान्तपूज्याशान्तवन्द्याशान्तग्रहसुधारिणी ॥ ॥ १०० ॥ शान्तरूपाशान्तियुक्ता शान्तचन्द्रप्रभाऽमला ॥ अमलाविमलाम्लानामालतीकुञ्जवासिनी ॥ १०१॥ मालती पुष्पसम्प्रीतामालतीपुष्पपूजिता ॥ महोग्रामहतीमध्यामध्यदेशनिवासिनी॥ १०२ ॥ मध्यमध्वनिसम्प्रीतामध्यमध्वनिकारिणी॥ मध्यमामध्यमप्रीतिर्म्मध्यमप्रेमपूरिता॥ १०३ ॥ मध्याङ्गचित्रवसनामध्यखिन्नामहोद्धता ॥ महेन्द्रकृतसम्पूजामहेन्द्रपरिवन्दिता॥ १०४॥ महेन्द्रजालसँय्युक्तामहेन्द्रजालकारिणी॥ महेन्द्रमानिताऽमानामानिनीगणमध्यगा॥ १०५ ॥ मानिनीमानसम्प्रीतामानविध्वंसकारिणी॥ मानिन्याकर्षिणी

मुक्तिर्म्मुक्तिदात्रीसुमुक्तिदा ॥ १०६ ॥ मुक्तिद्वेषकरीमूल्यकारिणीमूल्यहारिणी ॥ निर्म्मलामूलसँय्युक्तामूलिनीमूलमन्त्रिणी ॥१०७॥ मूलमन्त्रकृतार्हाद्यामूलमन्त्राग्घ्यर्हर्षिणी ॥ मूलमन्त्रप्रतिष्ठात्रीमूलमन्त्रप्रहर्षिणी ॥ १०८ ॥ मूलमन्त्रप्रसन्नास्यामूलमन्त्रप्रपूजिता ॥ मूलमन्त्रप्रणेत्रीचमूलमन्त्रकृतार्च्चना ॥ १०९॥ मूलमन्त्रप्रहृष्टात्मामूलविद्यामलापहा ॥ विद्याऽविद्यावटस्थाचवटवृक्षनिवासिनी ॥ ११० ॥ वटवृक्षकृतस्थानावटपूजापरायणा ॥ वटपूजापरिप्रीतावटदर्शनलालसा ॥ १११ ॥ वटपूजाकृताह्लादावटपूजाविवर्द्धिनी ॥ वशिनीविवशाराध्यावशीकरणमन्त्रिणी ॥ ११२ ॥ वशीकरणसम्प्रीतावशीकारकासिद्धिदा ॥ बटुकाबटुकाराध्याबटुकाहारदायिनी ॥ ११३ ॥ बटुकार्च्चापरापूज्यावटुकार्च्चाविवर्द्धिनी ॥ बटुकानन्दकर्त्रीचवटुकप्राणरक्षिणी ॥ ११४ ॥ बटुकेज्याप्रदाऽपारापारिणीपार्व्वतीप्रिया ॥ पर्व्वताग्रकृतावासापर्व्वतेन्द्रप्रपूजिता ॥११५॥ पार्व्वतीपतिपूज्याचपार्व्वतीपतिहर्ष्पदा ॥ पार्व्वतीपतिबुद्धिस्थापार्व्वतीपतिमोहिनी ॥ ११६ ॥ पार्व्वतीयद्विजाराध्यापर्व्वतस्थाप्रतारिणी ॥ पद्मलापद्मिनीपद्मापद्ममालाविभूषिता ॥ ११७ ॥ पद्मजेड्यपदापद्ममालालङ्कृतमस्तका ॥ पद्मार्च्चितपदद्वन्द्वापद्महस्तापयोधिजा ॥ ११८ ॥ पयोधिपारगन्त्रीचपाथोधिपरिकीर्त्तिता ॥ पाथोधिपारगापूतापल्वलाम्बुप्रतर्प्पिता ॥ ११९ ॥ पल्वलान्तःपयोमग्नापवमानगतिर्ग्गतिः ॥ पयःपानापयोदात्रीपानीयपरिकाङ्क्षिणी ॥१२०॥ पयोजमालाभरणा मुण्डमालाविभूषणा ॥ मुण्डिनीमुण्डहन्त्रीचमुण्डितामुण्डशोभिता ॥ ॥ १२१ ॥ मणिभूषामणिग्रीवामणिमालाविराजिता ॥ महामोहामहामर्ष्यामहामायामहाहवा ॥ १२२ ॥ मानवीमानवीपूज्या

मनुवंशविवर्द्धिनी ॥ मठिनीमठसंहन्त्रीमठसम्पत्तिहारिणी ॥ ॥ १२३ ॥ महाक्रोधवतीमूढामूढशत्रुविनाशिनी ॥ पाठीनभोजिनीपूर्णापूर्णहारविहारिणी ॥ १२४ ॥ प्रलयानलतुल्याभाप्रलयानलरूपिणी ॥ प्रलयार्णवसम्मग्नाप्रलयाब्धिविहारिणी ॥ ॥ १२५ ॥ महाप्रलयसम्भूता महाप्रलयकारिणी ॥ महाप्रलयसम्प्रीतामहाप्रलयसाधिनी ॥ १२६ ॥ महामहाप्रलयेज्याम हाप्रलयमोदिनी ॥ छेदिनीछिन्नमुण्डोग्राछिन्नाछिन्नरुहार्त्थिनी ॥ १२७ ॥ शत्रुसञ्छेदिनीछन्नाक्षोदिनीक्षोदकारिणी ॥ लक्षिणी लक्षसम्पूज्यालक्षितालक्षणान्विता ॥ १२८ ॥ लक्षशस्त्रसमा युक्तालक्षवाणप्रमोचिनी ॥ लक्षपूजापराऽलक्ष्यालक्षकोदण्डखण्डिनी ॥ १२९ ॥ लक्षकोदण्डसय्युक्तालक्षकोदण्डधारिणी ॥ लक्षलीलालयालभ्यालाक्षागारनिवासिनी ॥ १३० ॥ लक्षलोभपरालोलालक्षभक्तप्रपूजिता ॥ लोकिनीलोकसम्पूज्यालोकरक्षणकारिणी ॥ १३१ ॥ लोकवन्दितपादाब्जालोकमोहनकारिणी ॥ ललितालालितालीनालोकसंहारकारिणी ॥ ॥ १३२ ॥ लोकलीलाकरीलोक्यालोकसम्भवकारिणी ॥ भूतशुद्धिकरीभूतरक्षिणीभूतपोषिणी ॥ १३३ ॥ भूतवेतालसय्युक्ताभूतसेनासमावृता ॥ भूतप्रेतपिशाचादिस्वामिनीभूतपूजिता ॥ १३४ ॥ डाकिनीशाकिनीडेयाडिण्डिमारावकारिणी ॥ डमरूवाद्यसन्तुष्टाडमरूवाद्यकारिणी ॥ १३५ ॥ हूङ्कारकारिणीहोत्रीहाविनीहवनार्त्थिनी ॥ हासिनीह्रासिनीहास्यहर्षिणी हठवादिनी ॥ १३६ ॥ अट्टाट्टहासिनीटीकाटीकानिर्म्माणकारिणी ॥ टङ्किनीटङ्कितातङ्कटङ्कमात्रसुवर्णदा ॥ १३७ ॥ टङ्कारिणीटकाराढ्याशत्रुत्रोटनकारिणी ॥ त्रुटिताद्यत्रुटिरूपाचत्रुटिसन्देहकारिणी ॥ १३८ ॥ तर्प्पिणीतृट्परिक्लान्ताक्षुत्क्षामाक्षुत्प

रिप्लुता ॥ अक्षिणीताक्षिणीभिक्षाप्रार्त्थिनीशत्रुभक्षिणी ॥ १३९ ॥ काङ्क्षिणीकुट्टनीक्रूराकुट्टनीवेश्मवासिनी ॥ कुट्टनीकोटिसम्पूज्याकुट्टनीकुलमार्ग्गिणी ॥१४०॥कुट्टनीकुलसंरक्षाकुट्टनीकुलरक्षिणी ॥कालपाशावृताकन्याकुमारीपूजनप्रिया॥१४१॥कौमुदीकौमुदीहृष्टाकरुणादृष्टिसय्युता ॥ कौतुकाचारनिपुणाकौतुकागारवासिनी ॥ १४२ ॥ काकपक्षधराकाकरक्षिणीकाकसव्वृता ॥ काकाङ्करथसंस्थानाकाकाङ्कस्यन्दनास्थिता ॥ १४३॥ काकिनी काकदृष्टिश्चकाकभक्षणदायिनी ॥ काकमाताकाकयोनिःकाकमण्डलमण्डिता ॥१४४॥ काकदर्शनसंशीलाकाकसङ्कीर्ण्णमन्दिरा ॥ काकध्यानस्थदेहादिध्यानगम्याधमावृता ॥ १४५ ॥ घनिनीघनिसंसेव्याघनच्छेदनकारिणी ॥ घुन्घुराघुन्घुराकाराघूम्रलोचनघातिनी ॥ १४६ ॥ घूङ्कारिणीचघूम्मन्त्रपूजिताधर्म्मनाशिनी ॥ धूम्रवर्ण्णिनीधूम्राक्षीधूम्राक्षासुरघातिनी ॥ १४७ ॥ धूम्बीजजपसन्तुष्टाधूम्बीजजपमानसा ॥ धूम्बीजजपपूजार्हा धूम्बीजजपकारिणी ॥ १४८ ॥ धूम्बीजाकर्ष्णिताधृष्याधर्ष्णिणीधृष्टमानसा ॥ धूलीप्रक्षेपिणीधूलीव्याप्तधम्मिल्लधारिणी ॥१४९॥ धूम्बीजजपमालाढ्याधूम्बीजनिन्दकान्तका ॥ धर्म्माविद्वेषिणी धर्म्मरक्षिणीधर्म्मतोषिता ॥ १५० ॥ धारास्तम्भकरीधूर्त्ताधारावारिविलासिनी ॥ धांधींधूंधैम्मन्त्रवर्ण्णाधौंधः स्वाहास्वरूपिणी ॥ १५१ ॥ धरित्रीपूजिताधूर्व्वाधान्यच्छेदनकारिणी ॥ धिक्कारिणीसुधीपूज्याधामोद्याननिवासिनी ॥ १५२ ॥ धामोद्यानपयोदात्रीधामधूलीप्रधूलिता ॥ महाध्वनिमतीधूप्याधूपामोदग्रहर्ष्णिणी ॥ १५३ ॥ धूपादानमतिप्रीताधूपदानविनोदिनी ॥ धीवरीगणसम्पूज्याधीवरीवरदायिनी ॥ १५४ ॥ धीवरीगणमध्यस्थाधीवरीधामवासिनी ॥ धीवरीगणगोप्त्रीचधीवरीगणतोषि

ता ॥ १५५ ॥ धीवरीधनदात्रीचधीवरीप्राणरक्षिणी ॥ धात्री शाधातृसम्पूज्याधात्रीवृक्षसमाश्रया॥ ॥ १५६ ॥ धात्रीपूजनक र्त्रीचधात्रीरोपणकारिणी ॥ धूम्रपानरतासक्ता धूम्रपानरतेष्टदा ॥ १५७ ॥ धूम्रपानकरानन्दाधूम्रवर्ष्पणकारिणी ॥ धन्यशब्द श्रुतिप्रीताधुन्धुकारीजनच्छिदा ॥ १५८ ॥ धुन्धुकारीष्टसन्दा त्रीधुन्धुकारिसुमुक्तिदा ॥ धुन्धुकार्य्याराध्यरूपाधुन्धुकारिमन स्स्थिता ॥१५९॥ धुन्धुकारिहिताकाङ्क्षाधुन्धुकारिहितैषिणी॥ धिन्धिमाराविणीध्यात्रीध्यानगम्याधनार्त्तिघ्नी ॥ १६० ॥ धोरिणीघोरणप्रीताधारिणीघोररूपिणी ॥ धरित्रीरक्षिणीदेवीध राप्रलयकारिणी ॥ १६१ ॥ धराधरसुताऽशेषधाराधरसमद्यु तिः ॥ धनाध्यक्षाधनप्राप्तिर्द्धनधान्यविवर्द्धिनी ॥ १६२ ॥ ध नाकर्ष्पणकर्त्रीचधनाहरणकारिणी ॥ धनच्छेदनकर्त्रीच धनही नाधनप्रिया ॥ १६३ ॥ धनसँव्वृद्धिसम्पन्नाधनदानपरायणा ॥ १६४ ॥ धनहृष्टाधनपुष्टादानाध्ययनकारिणी ॥ धनरक्षाध नप्राणाधनानन्दकरीसदा ॥ १६५ ॥ शत्रुहन्त्रीशवारूढाशत्रु संहारकारिणी॥ शत्रुपक्षक्षतिप्रीताशत्रुपक्षनिषूदिनी ॥ १६६ ॥ शत्रुग्रीवाच्छिदाछायाशत्रुपद्धतिखण्डिनी ॥ शत्रुप्राणहराहा र्य्या शत्रून्मूलनकारिणी ॥ १६७ ॥ शत्रुकार्य्यविहन्त्रीचसाङ्ग शत्रुविनाशिनी ॥ साङ्गशत्रुकुलच्छेत्रीशत्रुसङ्घप्रदायिनी ॥ ॥ १६८ ॥ साङ्गसायुधसर्व्वारिसर्व्वसम्पत्तिनाशिनी ॥ साङ्ग सायुधसर्व्वारिदेहगेहप्रदाहिनी ॥ १६९ ॥ इतीदन्धूमरूपिण्या स्स्तोत्रन्नामसहस्रकम् ॥ यः पठेच्छून्यभवने सध्वान्तेयतमान सः ॥ १७० ॥ मदिरामोदयुक्तोवैदेवीध्यानपरायणः ॥ तस्य शत्रुः क्षयंयातियदिशक्रसमोपिवै ॥ १७१ ॥ भवपाशहरम्पुण्य न्धूमावत्याः प्रियम्महत् ॥ स्तोत्रंसहस्रनामाख्यम्ममवक्त्राद्विनि

र्गतम् ॥ १७२ ॥ पठेद्वाशृणुयाद्वापिशत्रुघातकरोभवेत् ॥ न देयम्परशिष्यायाऽभक्तायप्राणवल्लभे ॥ १७३ ॥ देयंशिष्याय भक्तायदेवीभक्तिपरायच॥इदंरहस्यम्परमन्दुर्ल्लभन्दुष्टचेतसाम् ॥ ॥ १७४ ॥ इतिधूमावतीसहस्रनामस्तोत्रंसम्पूर्णम् ॥

इति शाक्तप्रमोदे धूमावतीतन्त्रं समाप्तम् ।

